श्वसनं लोचने भुग्ने स्मृतिः स्थूला ज्वरोऽधिकः।
मोहः प्रलापनं कम्पो भ्रमो निद्रा च लक्षणैः॥
ज्ञातव्यो भुग्ननेत्रोऽयं सन्निपातः क्षयंकरः॥९॥
रक्तनिष्ठीवनं मूर्च्छा ज्वरो मोहस्तृषा भ्रमः।
वान्तिर्हिक्कातिसारश्च संज्ञानाशो हृदि व्यथा॥
मण्डलं श्यावरक्तञ्च देहेषु लक्षणैरिमैः।
ज्ञातव्यः सन्निपातोऽयं रक्तष्ठीवी निपातकः॥१०
प्रलापतापकर्णार्त्तिः प्रज्ञानाशोऽतितापवान्।
ज्ञेयः प्रलापकश्चिह्नैः सन्निपातोऽतिमारकः॥११
शरीरं हिमवत् शीतमतिसारश्च कम्पनम्।
कर्णनादो हस्ततापो हिक्का श्वासः क्रमोत्तरम्।
सर्व्वाङ्गशीतलो हन्ति शीताङ्गः सन्निपातकः॥१२॥
त्रिदोषश्च सुखं शुष्कं निद्रावैकल्यकष्टवाक्।
निश्चेतनमतिश्वासो मन्दाग्निर्बलहीनता॥
मृत्युतुल्यमभिन्यासं सन्निपातञ्च लक्षयेत्॥१३॥
इति चक्रपाणिदत्तः॥*॥

यं दृष्ट्वा यस्य सम्भवः स तस्य सन्निपातः। सन्निपातविधिरनिमित्तं तद्विघाताय। इति कलापव्याकरणे ४ वृत्तौ २ प्रकरणम्॥ समूहः। यथा,—

"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥"
इति मेघदूतम्॥

सम्यक्प्रकारेण पतनं मरणञ्च॥

सन्निपातज्वरः, पुं, (सम्यक् निपातो नाशो यस्मात् तादृशो ज्वरः।) त्रिदोषजज्वरः। स तु अष्टप्रकारज्वरान्तर्गतज्वरविशेषः। अष्टत्वं विवृणोति। वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः। द्वन्द्वजाश्च त्रयः। वातपैत्तिकः वातश्लैष्मिकः पित्तश्लैष्मिकश्चेति। संघातजः सन्निपातिक एकः।
"द्व्युल्बणैकोल्बणैः षट् स्युर्हीनमध्यादिकैश्च षट्
समैश्चैको विकारास्ते सन्निपातास्त्रयोदश॥"
इति चरकेण त्रयोदश सन्निपाता उक्ताः॥

ते यथा। वातोल्वणः १ पित्तोल्वणः २ कफोल्वणः ३। वातपित्तोल्वणः ४ वातश्लेष्मोल्वणः५ पित्तश्लेष्मोल्वणः ६ एवं षट्। अधिकवातो मध्यपित्तो हीनकफः१ अधिकवातो मध्यकफो हीनपित्तः २ अधिकपित्तो मध्यवातो हीनकफः ३ अधिकपित्तो मध्यमकफो हीनवातः४ अधिककफो मध्यवातो हीनपित्तः ५ अधिककफो मध्यपित्तो हीनवातश्चेति ६ षट्। तुल्यल्वण एकः १। एवं त्रयोदश। अत्र तु त्रिदोषजत्वेन साम्यात् सान्निपातिक एक एव गणितः। आगन्तुजोऽपि एक एव। अत्र आगन्तुजशब्देन अभिघातादयो हेतव उच्यन्ते। कुत्रचिद्दाश्रयः कार्य्यकारणयोरभेदोपचारात्। इति ज्वराधिकारे भावप्रकाशः॥*॥ अथ सन्निपातज्वराधिकारमाह। तत्र सन्निपातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह।

"त्रिदोषजनकैर्व्वातपित्तश्लेष्मामगेहगाः।
वह्निर्निरस्य कोष्ठाग्निं रसगा ज्वरकारिणः॥"

पूर्व्वरूपमाह।

"प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे नृणाम्।"

सन्निपातज्वरस्य सामान्यानि लक्षणान्याह।

"क्षणे दाहः क्षणे शीतमस्थि सन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः।
तन्द्रा मोहः प्रलापश्च कासश्वासोऽरुचिर्भ्रमः॥
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परा।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः॥
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः॥"

लोचने सास्रावे साश्रुणी। कलुषेऽस्वच्छे। निर्भुग्ने निर्गते कुटिले च। कण्ठः शूकैरिव धान्याग्रैरिवावृतः। जिह्वा परिदग्धा परिदग्धेव ज्ञायते। अथवा परिदग्धेव कृष्णा दृश्यते। स्रस्ताङ्गता शिथिलगात्रता। परा अतिशयिता। ष्ठीवनमित्यादि कफसंयुक्तस्य रक्तस्य पित्तस्य च ष्ठीवनम्। शिरसो लोठनमितस्ततः शिरश्चालनम्। कृशत्वं नातिगात्राणां गात्राणामतिशयितं कार्य्यं न व्याधिप्रभवात्। प्रततं निरन्तरम्। कोठः वरटीदष्टसंस्थानः कोठ इत्यभिधीयते। श्यावः कपिशो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा। स्रोतसां कर्णनासादीनाम्॥*॥ ननु वातादयः परस्परविरुद्धगुणास्तेषां सम्भूयैककार्य्यारम्भकत्वं नोपपद्यते परस्परोपघातात् दहनसलिलयोरिव तत् कथं वातपित्तकफा मिलित्वा विकारोत्पादकाः। अत्र समाधानमुक्तं दृढ़बलेन।

"विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम्।
दोषाः सहजसात्म्यत्वाद्विषं घोरमहीनिव॥"

गदाधरस्तु हेत्वन्तरमुक्तवान्।

"दैवाद्दोषस्वभावाद्वा दोषाणां सान्निपातिके।
विरुद्धैश्च गुणैः कश्चिन्नोपघातः परस्परम्॥" इति

ननु भिन्नचयप्रकोपकालानां वातपित्तकफानां युगपदुत्थानाभावात् कथं सम्भूय सन्निपातज्वरारम्भकत्वमुपपद्यते। उच्यते। त्रिदोषजनकनिदानबलेन युगपदेषां प्रकोपादिति सिद्धान्तः॥*॥ अथ सामान्यसन्निपातज्वरस्य त्रयोदश विशेषानाह।

"एकोल्वणास्त्रयस्ते स्युर्द्व्युल्वणाश्च तथेति षट्।
तुल्योल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः॥
प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट्।
सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश॥"

तत्र प्रवृद्धवातो मध्यपित्तो हीनकफः १ मध्यवातः प्रवृद्धपित्तो हीनकफः २ हीनवातः प्रवृद्धपित्तो मध्यकफः३ प्रवृद्धवातो हीनपित्तो मध्यकफः ४ मध्यवातो हीनपित्तः प्रवृद्धकफः५ हीनवातो मध्यपित्तः प्रवृद्धकफश्चेति षट् ६। तेषां नामानि क्रमादाह।

"विस्फारकश्चाशुकारी कम्पनो वभ्रुसंज्ञकः।
शीघ्रकारी तथा भल्लुः सप्तमः कूटपाकलः॥
सम्मोहकः पाकलश्च याम्यः क्रकच इत्यपि।
तद्वत् कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः॥"

तन्त्रान्तरे विस्फारक इत्यत्र विस्फुरक इति पाठः। वभ्रुस्थाने विभ्रुरिति पाठः। कुत्रापि विद्ध इत्यपि पाठः। भल्लुरित्यत्र फल्गुरिति पाठः। याम्य इत्यत्र संग्राम इति पाठः। कर्कटक इत्यत्र कर्कोटक इति पाठः॥*॥ तत्र वातोल्वणस्य लक्षणमाह।

"श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथुः।
पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च॥
वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
एष विस्फारको नाम्ना सन्निपातः सुदारुणः॥"१

अथ पित्तोल्वणस्य लक्षणमाह।

अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च।
गात्रे च विन्दवो रक्ता दाहोऽतीव प्रजायते।
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
भिषग्भिः सन्निपातोऽयमाशुकारी प्रकीर्त्तितः॥"२॥*॥

अथ कफोल्वणस्य लक्षणमाह।

"जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि।
प्रस्तब्धे नयने चैव मुखमाधूर्य्यमेव च॥
कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः॥"३॥

अथ वातपित्तोल्वणस्य लक्षणमाह।

"वातपित्ताधिको यस्य सन्निपातः प्रकुप्यति।
तस्य ज्वरो मदस्तृष्णा मुखशोषप्रमीलकाः।
आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमाः।
मुनिभिर्वभ्रुनामायं सन्निपात उदाहृतः॥"४॥*

अथ वातश्लेष्मोल्वणस्य लक्षणमाह।

"वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति।
तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रहः॥
शूलमस्विद्यमानस्य हिक्का श्वासश्च जायते।
असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते।
न हि जीवत्यहोरात्रमनेनाविष्टविग्रहः॥"५॥

अथ पित्तश्लेष्मोल्वणस्य लक्षणमाह।

"पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति।
अन्तर्दाहो बहिः शीतं तस्य तृष्णा प्रवर्द्धते॥
तुद्यते दक्षिणं पार्श्वमुरःशीर्षगलग्रहाः।
ष्ठीवति श्लेष्मपित्तञ्च कृच्छ्रात् कण्ठश्च दूयते॥
विड्भेदः श्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः।
ऋषिभिर्भल्लुनामायं सन्निपात उदाहृतः॥"६॥

अथ वातपित्तश्लेष्मोल्वणस्य लक्षणमाह।

"सर्व्वदोषोल्वणे यस्य सन्निपातः प्रकुप्यति।